Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 4 | ISSN : 2582-0095

# काव्यप्रकाशे शब्दालङ्काराः



नर्मदा बेहेरा
शोधच्छात्रा,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

**सारांशः** –"काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते" इति काव्यप्रकाशस्य नवम-दशमोल्लासे च अलङ्कारानां चर्चा विहिता। तत्र नवमोल्लासे शब्दालङ्काराणां प्रतिपादनम् कृतम् वक्रोक्ति-अनुप्रास-यमक-श्लेष-चित्र-पुनरुक्तवदाभासः इति षड् शब्दालङ्कृतयः।

मुख्यशब्दः-अलङ्कारः-वक्रोक्तिः-अनुप्रासः-यमकम्-चित्र-पुनरुक्तवदाभासः चेति।

काव्यप्रकाशो हि नामा ग्रन्थः सर्वेषु साहित्यालङ्कारग्रन्थेषु चूडामणित्वमुपगतो विभाति नितराम्। वाग्देवतावतारः मम्मटभट्टः अस्य ग्रन्थस्य कर्ता। ग्रन्थस्यास्य प्रतिपदं गूढव्यञ्जनक्षमता परिलक्ष्यते। सूक्ष्मेक्षिकया विषयसमीक्षापाटवेन पटीयनाचर्यः मम्मटः काव्यप्रकाशग्रन्थं दशमोल्लासे विभजति।

1. तत्र प्रथमोल्लासे मङ्गलाचरणमनन्तरं काव्यप्रयोजनं , काव्यकारणं , काव्यस्वरूपं , काव्यभेदश्च वर्णयति।
2. द्वितीयोल्लासे शब्दार्थयोः स्वरूपं तथा च शाब्दीव्यञ्जनां प्रतिपादयति।
3. तृतीयोल्लासे अर्थस्वरूपं तथा च "वक्तृबोद्ध--" इति आर्थीव्यञ्जनां लक्षयति।
4. चतुर्थोल्लासे काव्यभेदस्य प्रथमप्रकारस्य ध्वनिकाव्यस्य स्वरूपं,रस स्वरूपं तेषां भेदाः,प्रभेदाश्च,शरेषुयुगखेन्दवः (१०४५५) ध्वनिभेदाश्च उपस्थिताः।
5. पञ्चमोल्लासे गुणीभूतव्यङ्ग्यस्य अष्टप्रकारकभेदाः,ध्वनिविरोधि-आचार्याणां मतखण्डनपुरस्सरं व्यञ्जना स्थापनं च विहितम्।
6. षष्ठोल्लासे काव्यभेदस्य तृतीयप्रकारस्य चित्रकाव्यस्य द्वौ भेदौ (शब्दचित्रं,वाच्यचित्रञ्च) वर्णितौ।
7. सप्तमोल्लासे काव्यदोषानां स्वरूपं वक्ष्यति तथा पददोषाः,पदार्थदोषाः,वाक्यदोषाः,अर्थदोषाः,रसदोषाः च सोदाहरणं उपस्थापयति।
8. अष्टमोल्लासे उत्कर्षहेतवः अचलस्थितयः गुणस्य स्वरूपं माधुर्य-ओज-प्रसादेति त्रिविधिं गुणं वर्णयति।

9. नवमोल्लासे शब्दालङ्काराणां लक्षणं लक्षयति।

10. दशमोल्लासे एकषष्ठी (६१)अर्थालङ्काराणां वर्णनं भवति।

काव्यप्रकाशस्य नवमोल्लासे मम्मटेन अलङ्कारस्य स्वरूपमेवं लक्षयति।

यथा -

**"उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।"**

**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः॥"**

**(का.प्र.८.६७)**

ये धर्माः अङ्गद्वारेण अङ्गिनो कदाचित् न नियमेन उपकुर्वन्ति ते धर्माः अनुप्रासादयोऽलङ्काराः हारादिवत् भवन्ति।अलङ्काराणां सर्वप्रथमं उल्लेखो भरतकृते नाट्यशास्त्रे प्राप्यते तत्र यमक-उपमा-रूपक-दीपकानीति चत्वारोऽलङ्काराः निर्दिश्यन्ते । अग्निपुराणे १५ अलङ्काराः , वामनकृते काव्यालङ्कारसूत्रे ३३ अलङ्काराः,दण्डीकृते काव्यादर्शे ३५ अलङ्काराः ,भामहकृते काव्यालङ्कारे ३९ अलङ्काराः, उद्भटकृते काव्यालङ्कारसारसंग्रहे ४१ अलङ्काराः , रुद्रटकृते काव्यालङ्कारे ५२ अलङ्काराः , मम्मटकृते काव्यप्रकाशे ६७ अलङ्काराः विविच्यन्ते।

तेषु अलङ्कारेषु षड् शब्दालङ्काराः भवन्ति।

यथा –

**वक्रोक्तिरप्यनुप्रासो यमकं श्लेष चित्रके।**

**पुनरुक्तवदाभासः शब्दालङ्कृतयस्तु षड् ॥**

| अ.क्र | अलङ्काराणां नामानि | लक्षणानि | उदाहरणानि |
|---|---|---|---|
| १. | वक्रोक्तिः | यदुक्तमन्यथा वाक्यमन्यथाऽन्येन योज्यते। श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा॥ | पदभङ्गश्लेषः-नारीणामनुकूलमाचरसि चेत्.. |
| | | | अभङ्गश्लेष : - अहो केनेदृशी बुद्धिरुणा ..... |
| | | | काक्वा – गुरुजनपरतन्त्रतया दूरतरं... |
| २. | अनुप्रासः | वर्णसाम्यमनुप्रासः। | ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी .... |
| | | छेकानुप्रासः - सोऽनेकस्य सकृत्पूर्वः। | |
| | | वृत्त्यनुप्रास : - एकस्याप्यसकृत्परः। | अपसारय घनसारं कुरु हारं दूर..... |
| | | लाटानुप्रासः - शाब्दस्तु लाटानुप्रासी भेदे तात्पर्यमात्रतः। | यस्य न सविधे दयिता दवदहन ... |
| | | पदस्य लाटानुप्रासः | वदनं वरवर्णिन्यास्तस्याः सत्यं |
| | | नाम्नः लाटानुप्रासः | सितकरकररुचिरविभा विभाकराकार.... |
| ३. | यमकम् | अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः | १.सन्दंशम्-सन्नारीभरणोमायमाराध्य |

| | | | |
|---|---|---|---|
| | | । | विधुशेखरं |
| | | | २.युग्मकम्-विनायमेनो नयताऽसुखादिना विना.. |
| | | | ३.महायमकम्- स त्वारम्भरतोऽवश्यमबलं.. |
| | | | ४.सन्दष्टकम्-अनन्तमहिमव्याप्तविश्वां वेधा .. |
| | | | ५.आद्यान्तिकम्-यदानतोऽयदानतो नयात्ययं ... |
| | | | ६.उत्तरार्धसमुच्चय:-सरस्वति प्रसादं मे स्थिति |
| | | | ७.पूर्वोत्तरार्धसमुच्चय : - ससार साकं दर्पेण.. |
| | | | ८.अनियतम्-मधुपराजिपराजितमानिनीजनमनः |
| ४. | श्लेष : | वाच्यभेदेन भिन्ना यद् युगपद्भाषणस्पृशः । श्लिष्यन्ति शब्दा : श्लेषोऽसावक्षरादिभिरष्टधा ॥ | १.वर्णश्लेष : - अलङ्कारः शङ्काकरनरकपालं .. २.पदश्लेष : - पृथुकार्तस्वरपात्रं भूषितनि : शेष ... ३.४.लिङ्गवचनयो : - भक्तिप्रह्वविलोकनप्रणयिनी ५.भाषाश्लेष:- महदे सुरसन्धम्मे तमवसमासङ्गम् ६.प्रकृतिश्लेष :- अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु . ७.प्रत्ययश्लेष :- रजनिरमणमौले : पादपद्मावलोक ८.विभक्तिश्लेष : - सर्वस्वं हर सर्वस्य त्वं |
| | | | अभङ्गः- योऽसकृत्परगोत्राणां पक्षच्छेदक्षणक्षम : (इत्यभङ्गः-स्वयञ्च पल्लवाताम्रभास्वत्कर..... इतिसभङ्गः-प्रभातसन्ध्येवास्वापफललुब्धेहितप्रदा ) अर्थश्लेष : - स्तोकेनोन्नतिमायाति .... गुणक्रिययोः साम्येऽपि उपमा- सकलकलं पुरमेतज्जातं ... पूर्णोपमाया निर्विषयत्वापत्ते : - देव ! त्वमेव पाताल , रूपकाभास : - सद्वंशमुक्तामणिः ॥ |
| | | | श्लेषाभास : - अबिन्दुसुन्दरी नित्यं |

| | | | |
|---|---|---|---|
| | | | गलल्लावण्य . व्यतिरेकाभास : - नाल्प : कविरिव स्वल्पश्लोको समासोक्त्याभास : - अनुरागवती सन्या दिवसः विरोधाभास : - आदाय चापमचलं कृत्वाहीन .. |
| ५. | चित्रालङ्कारः | तच्चित्रं या वर्णानां खड्गाद्याकृतिहेतुता। | खड्गबन्ध : - मारारिशक्ररामेभमुखैरासाररंहसा। |
| | | | मुरजबन्धः - सरला बहुलारम्भतरलालिबरलारवा। |
| | | | पडाबन्धः- भासते प्रतिभासार रसाभाताहताविभा। |
| | | | सर्वतोभद्रम् - रसासार ! रसा सारसायताक्ष ! ..... |
| ६. | पुनरुक्तबदाभासः | पुनरुक्तवदाभासो विभिन्नाकारशब्दगा।\| एकार्थतेव। | शब्दगत : सभङ्गः- अरिवधदेहशरीर : सहसा रथिसूत ..... |
| | | | अभङ्गः- चकासत्यङ्गनारामा : कौतुकानन्दहेतवः। |
| | | | शब्दार्थगत : - तनुवपुरजघन्योऽसौ करिकुम्चर ... |